# चतुर्थः पाठः

## सर्वनाम-प्रयोगः

एषः विद्यालयः।
अत्र छात्राः, शिक्षकाः,
शिक्षिकाः च सन्ति।





एषा सङ्गणकयन्त्र-प्रयोगशाला अस्ति।
एतानि सङ्गणकयन्त्राणि सन्ति।



एतत् अस्माकं विद्यालयस्य
उद्यानम् अस्ति।
उद्याने पुष्पाणि सन्ति।
वयम् अत्र क्रीडामः पठामः च।



**ऋचा** – तव नाम किम्?
**प्रणवः** – मम नाम प्रणवः। तव नाम किम्?
**ऋचा** – मम नाम ऋचा। त्वं कुत्र पठसि?
**प्रणवः** – अहम् अत्र एव पठामि।
**ऋचा** – अहम् अपि अत्र एव पठामि।
इदानीम् आवां मित्रे स्वः।

**शिक्षिका** – छात्राः! यूयं किं कुरुथ?
**छात्राः** – आचार्ये! वयं गच्छामः।
**शिक्षिका** – यूयं कुत्र गच्छथ?
**छात्राः** – वयं सभागारं गच्छामः।
**शिक्षिका** – युष्माकं पुस्तकानि कुत्र सन्ति?
**छात्राः** – अस्माकं पुस्तकानि अत्र सन्ति।





**शिक्षकः** – छात्रौ! युवां किं कुरुथः?
**छात्रौ** – आचार्य! आवां श्लोकं गायावः।
**शिक्षकः** – शोभनम्, किं युवां श्लोकं न लिखथः?
**छात्रौ** – आवां लिखावः, पठावः, गायावः,
चित्राणि अपि रचयावः।
**शिक्षकः** – बहुशोभनम्।

# शब्दार्थाः



| | | |
|---|---|---|
| **सङ्गणकयन्त्राणि** | – | (अनेक) कम्प्यूटर |
| **अस्माकम्** | – | हमारा/हम लोगों का |
| **वयम्** (सर्वनाम) | – | हम सब |
| **तव** | – | तेरा |
| **मम** | – | मेरा |
| **त्वम्** (सर्वनाम) | – | तुम |
| **अहम्** (सर्वनाम) | – | मैं |
| **एव** (अव्यय) | – | ही |
| **अपि** (अव्यय) | – | भी |
| **इदानीम्** (अव्यय) | – | अब/इस समय |
| **आवाम्** (सर्वनाम) | – | हम दोनों |
| **मित्रे** (नपुं.) | – | (दो) मित्र |
| **स्वः** | – | (हम दोनों) हैं |
| **यूयम्** (सर्वनाम) | – | तुम सब |
| **आचार्ये!** | – | शिक्षिका (सम्बोधन) |
| **युष्माकम्** | – | तुम्हारा/तुम लोगों का |
| **कुत्र** | – | कहाँ |
| **सभागारम्** | – | सभागार को |
| **युवाम्** (सर्वनाम) | – | तुम दोनों |
| **आचार्य!** | – | गुरु/शिक्षक (सम्बोधन) |
| **शोभनम्** | – | अच्छा |
| **गायावः** | – | (हम दो) गाते हैं/गाती हैं |
| **रचयावः** | – | (हम दो) बनाते हैं/बनाती हैं |

## अभ्यासः



### 1. उच्चारणं कुरुत–

| | | |
|---|---|---|
| अहम् | आवाम् | वयम् |
| माम् | आवाम् | अस्मान् |
| मम | आवयोः | अस्माकम् |
| त्वम् | युवाम् | यूयम् |
| त्वाम् | युवाम् | युष्मान् |
| तव | युवयोः | युष्माकम् |

### 2. निर्देशानुसारं परिवर्तनं कुरुत–

| | | | | |
|---|---|---|---|---|
| **यथा**– अहं पठामि। | – | (बहुवचने) | – | **वयं पठामः।** |
| (क) अहं नृत्यामि। | – | (बहुवचने) | – | ................................ |
| (ख) त्वं पठसि। | – | (बहुवचने) | – | ................................ |
| (ग) युवां क्रीडथः। | – | (एकवचने) | – | ................................ |
| (घ) आवां गच्छावः। | – | (बहुवचने) | – | ................................ |
| (ङ) अस्माकं पुस्तकानि। | – | (एकवचने) | – | ................................ |
| (च) तव गृहम्। | – | (द्विवचने) | – | ................................ |





## 3. कोष्ठकात् उचितं शब्दं चित्वा रिक्तस्थानानि पूरयत-

(क) ...................... पठामि। (वयम्/अहम्)

(ख) ...................... गच्छथः। (युवाम्/यूयम्)

(ग) एतत् ...................... पुस्तकम्। (माम्/मम)

(घ) ...................... क्रीडनकानि। (युष्मान्/युष्माकम्)

(ङ) ...................... छात्रे स्वः। (वयम्/आवाम्)

(च) एषा ...................... लेखनी। (तव/त्वाम्)

## 4. क्रियापदैः वाक्यानि पूरयत-

| | | | | | |
|---|---|---|---|---|---|
| पठसि | धावामः | गच्छावः | क्रीडथः | लिखामि | पश्यथ |

**यथा**- अहं **पठामि**।

(क) त्वं ......................

(ख) आवां ..................

(ग) यूयं ......................

(घ) अहं ......................

(ङ) युवां ......................

(च) वयं ......................

## 5. उचितपदैः वाक्यनिर्माणं कुरुत–

| | | | | | |
|---|---|---|---|---|---|
| मम | तव | आवयोः | युवयोः | अस्माकम् | युष्माकम् |

**यथा**– एषा **मम** पुस्तिका।

(क) एतत् ........................ गृहम्।

(ख) ........................ मैत्री दृढा।

(ग) एषः ........................ विद्यालयः।

(घ) एषा ........................ अध्यापिका।

(ङ) भारतम् ........................ देशः।

(च) एतानि ........................ पुस्तकानि।

## 6. एकवचनपदस्य बहुवचनपदं, बहुवचनपदस्य एकवचनपदं च लिखत–

**यथा**– एषः — एते

(क) सः — ............

(ख) ताः — ............

(ग) एताः — ............

(घ) त्वम् — ............

(ङ) अस्माकम् — ............

(च) तव — ............

(छ) एतानि — ............

## 7. वार्तालापे रिक्तस्थानानि पूरयत–

यथा– प्रियंवदा – शकुन्तले! **त्वं** किं करोषि?

शकुन्तला – प्रियंवदे! .................. नृत्यामि, .................. किं करोषि?

प्रियंवदा – शकुन्तले! .................. गायामि। किं .................. न गायसि?

शकुन्तला – प्रियंवदे! .................. न गायामि। .................. तु नृत्यामि।

प्रियंवदा – शकुन्तले! किं .................. माता नृत्यति।

शकुन्तला – आम्, .................. माता अपि नृत्यति।

प्रियंवदा – साधु, .................. चलावः।

## 8. उपयुक्तेन अर्थेन सह योजयत–

| शब्दः | अर्थः |
|---|---|
| सा | तुम दोनों का |
| तानि | तुम सब |
| अस्माकम् | मेरा |
| यूयम् | वह (स्त्रीलिङ्ग) |
| आवाम् | तुम्हारा |
| मम | वे (नपुंसकलिङ्ग) |
| युवयोः | हम दोनों |
| तव | हमारा |

